# Ritivirachitam Shankara Stotram

# રિટિવિરચિતં શઙ્કરસ્તોત્રમ્

## Document Information

Text title : Ritivirachitam Shankara Stotram

File name : riTivirachitaMshankarastotraM.itx

Category : shiva, shivarahasya, stotra

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | shivAkhyaH chaturthAMshaH | adhyAyaH 24 | 7-12, 19-21||

Latest update : August 20, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 23, 2023

*sanskritdocuments.org*

# Ritivirachitam Shankara Stotram

# રિટિવિરચિતં શઙ્કરસ્તોત્રમ્

અસમકુસુમબાણપાણિતાતૈકબાણઃ
અસુમતિભવહીનઃ સોમધામાલલામઃ (?) ॥ ૭॥

સામસ્તોમૈકભૂમા રવિશશિહુતભુગ્ધામ સીમા ત્વમાત્મા
 સર્વેષાં ભૂરિકામપ્રદવરદગિરી દેવદેવોઽસિ સોમઃ ।
ઉર્વીમૌર્વીક દર્વીકર રથગિરિધૃગ્બાણબાણાસનં તે
 વિષ્ણુર્જિષ્ણુસ્ત્વમેવાગમવરતુરગોત્તુઙ્ગહેષૈરપીડ્યઃ ॥ ૮॥

ધાતા યન્તા સુરાન્યે તવ હર સુકગઃ કિઙ્કરાઃ શઙ્કર ત્વાં
સ્તોતું જ્ઞાતું કિલેશં મમ વરકરણે કારણં ત્વં મહેશ ॥ ૯॥

વામદેવ જિતકામ સામજસ્તોમસીમ સુદિધીતિલલામ ।
વ્યોમકેશ કુશકાશપૂજિતોત્કૃષ્ટકોશગણપઞ્ચકદૂર ॥ ૧૦॥

અજ ગજવરમૌલિકૃત્તિધારિન્ સુરગજરાજસમર્ચિતાબ્જપાદ ।
અજગજકરણેષુ કારણં ત્વાં ભજતાં નાસ્તિ ભવો ભવ પ્રપન્ને ॥ ૧૧॥

મયિ કુરુ કરુણાં પિનાકપાણે ભવભાવેષુ નિમગ્નમેનમીશ ।
સુદયારસસારયા દૃશા કૃશમાદ્યાઽદ્ય વિલોકયેન્દુચૂડ ॥ ૧૨॥

સ્વર્ણવર્ણકૃતનેત્રકર્ણજાપારહાર ગગનર્ણવસંસ્થ ।
ઊર્ણનાભિરિવ જાગતમેતત્ત્વદ્ગતં વિસૃજસેઽત્સિ ચ તૂર્ણમ્ ॥ ૧૯॥

શર્વ સર્વપરિપૂરિતકામસ્તોમબાણગણના કરુણાઢ્ય ।
લોકનેઽપિ કલનેઽપિ કાલતઃ કામકોપદમનાવ્યયમૂર્તે ॥ ૨૦॥

શ્રીમત્ત્રિયમ્બક સદાશિવ વેદવેદ્ય વૈદ્યોત્તમ પ્રમથનાથ સુરાસુરેડ્ય ।
વિશ્વનાથ મમ નાથ પાહિ માં મામ નાથ ગિરિજાધવ નાથ ॥ ૨૧॥
(વિશ્વનાથ મમ નાથ પાહિ માં મામ ન નાથો યસ્યેતિ વ્યુત્પત્તિઃ) ॥ ૨૧॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવાખ્યે રિટિવિરચિતં શઙ્કરસ્તોત્રં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । શિવાખ્યઃ ચતુર્થાંશઃ । અધ્યાયઃ ૨૪ । ૭-૧૨, ૧૯-૨૧ ॥

- .. shrIshivarahasyam . shivAkhyaH chaturthAMshaH . adhyAyaH 24 . 7-12, 19-21..

Notes: Riṭi રિટિ; the son of Ṛṣi Uddālaka ઋષિ ઉદ્દાલક, prays with dedication to Śiva શિવ on Nīla નીલ hills after being ridiculed by his father. Śiva શિવ is much pleased and Graces Riṭi રિટિ with greater love and affection than He would to even Gaṇeśa ગણેશ and Skanda સ્કન્દ. Śiva શિવ further accords to Riṭi રિટિ, the status of ŚivaGaṇa શિવગણ, friendship of Bhṛṅgi ભૃઙ્ગિ, and residence with Him at Kailāsa કૈલાસ.

Proofread by Ruma Dewan

---

*Ritivirachitam Shankara Stotram*

pdf was typeset on December 23, 2023

Please send corrections to *sanskrit@cheerful.com*